# Shri Durga Kavacham 3

# શ્રીદુર્ગાકવચમ્ ૩

## Document Information

Text title : durgAkavacham 3

File name : durgAkavacham3.itx

Category : devii, devI, durgA, kavacha

Location : doc_devii

Proofread by : Aruna Narayanan

Latest update : October 17, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 17, 2020

*sanskritdocuments.org*

# Shri Durga Kavacham 3

# શ્રીદુર્ગાકવચમ્ ૩

શ્રીદેવ્યુવાચ -
પુરા શ્રુતં મહાદેવ ! શવસાધનમેવ ચ ।
શ્મશાન-સાધનં નાથ ! શ્રુતં પરમમાદરાત્ ॥ ૧॥

ન સ્ત્રોતં કવચં નાથ ! શ્રુતં ન શવસાધને ।
કવચેન મહાદેવ ! સ્ત્રોત્રેણૈવ ચ શઙ્કર ! ।
કથં સિદ્ધિર્ભવેદ્ દેવ ! ક્ષિપ્રં તદ્ બ્રૂહિ સામ્પ્રતમ્ ॥ ૨॥

શિવ ઉવાચ -
શ‌ૃણુ દેવિ! વરારોહે ! દુર્ગે ! પરમસુન્દરિ ! ।
સિદ્ધ્યર્થે વિનિયોગઃ સ્યાત્ શઙ્કરસ્ય નિયન્ત્રણાત્ ॥ ૩॥

અથ દુર્ગાકવચમ્ ।
સિદ્ધિં સિદ્ધેશ્વરી પાતુ મસ્તકં પાતુ કાલિકા ।
કપાલં કામિની ભાલં પાતુ નેત્રં નગેશ્વરી ॥ ૪॥

કર્ણૌ વિશ્વેશ્વરી પાતુ હૃદયં જગદમ્બિકા ।
કાલી સદા પાતુ મુખં જિહ્વાં નીલ-સરસ્વતી ॥ ૫॥

કરૌ કરાલ-વદના પાતુ નિત્યં સુરેશ્વરી ।
દન્તં ગુહ્યં નખં નાભિં પાતુ નિત્યં હિમાત્મજા ॥ ૬॥

નારાયણી કપોલઞ્ચ ગણ્ડાગણ્ડં સદૈવ તુ ।
કેશં મેં ભદ્રકાલી ચ દુર્ગા પાતુ સુરેશ્વરી ॥ ૭॥

પુત્રાન્ રક્ષતુ મે ચણ્ડી ધનં પાતુ ધનેશ્વરી ।
સ્તનૌ વિશ્વેશ્વરી પાતુ સર્વાઙ્ગં જગદીશ્વરી ॥ ૮॥

ઉગ્રતારા સદા પાતુ મહાનીલ-સરસ્વતી ।
પાતુ જિહ્વાં મહામાયા પૃષ્ઠ મેં જગદમ્બિકા ॥ ૯॥

હરપ્રિયા પાતુ નિત્યં શ્મશાને જગદીશ્વરી ।
સર્વાન્ પાતુ ચ સર્વાણી સદા રક્ષતુ ચણ્ડિકા ॥ ૧૦॥

કાત્યાયની કુલં પાતુ સદા ચ શવવાહિની ।
ઘોરદંષ્ટ્રા કરાલાસ્યા પાર્વતી પાતુ સર્વદા ॥ ૧૧॥

કમલા પાતુ બાહ્યં મે મન્ત્રં મન્ત્રેશ્વરી તથા ।
ઇત્યેવં કવચં દેવિ દેવાનામપિ દુર્લભમ્ ॥ ૧૨॥

યઃ પઠેત્ સતતં ભક્ત્યા સિદ્ધિમાપ્નોતિ નિશ્ચિતમ્ ।
સિદ્ધિકાલે સમુત્પન્ને કવચં પ્રપઠેત્ સુધીઃ ॥ ૧૩॥

અજ્ઞાત્વા કવચં દેવિ ! યશ્ચ સિદ્ધિમુપક્રમઃ ।
સ ચ સિદ્ધિં ન વાપ્નોતિ ન મુક્તિં ન ચ સદ્ગતિમ્ ॥ ૧૪॥

અતએવ મહામાયે ! કવચં સિદ્ધિકારકમ્ ।
દેવાનાઞ્ચ નરાણાઞ્ચ કિન્નરાણાઞ્ચ દુર્લભમ્ ।
પઠિત્વા કવચં ચણ્ડિ ! શીઘ્ર સિદ્ધિમવાપ્નુયાત્ ॥ ૧૫॥

મહોત્પાતે મહાદુઃખે મહાવિપદિ સઙ્કટે ।
પ્રપઠેત્ કવચં દેવિ ! પઠિત્વા મોક્ષમાપ્નુયાત્ ॥ ૧૬॥

શૂન્યાગારે શ્મશાને ના કામરૂપે કામરૂપે મહાઘટે ।
સ્વવામા-મન્દિરે કાલેઽપ્યથવા કામમન્દિરે ।
મન્ત્રી મન્ત્રં જપેદ્ બુદ્ધ્યા ભક્ત્યા પરમયા યુતઃ ॥ ૧૭॥

મૂલે દલે ફલે વાપ્યનલે કાલેઽનિલેઽનલે ।
જલે પઠેત્ પ્રાણબુદ્ધ્યા મનસા સાધકોત્તમઃ ॥ ૧૮॥

ઇતિ શ્રીમુણ્ડમાલાતન્ત્રે ષષ્ઠં પટલાન્તર્ગતં દુર્ગાકવચં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Durga Kavacham 3*

pdf was typeset on October 17, 2020

Please send corrections to *sanskrit@cheerful.com*